श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीश्रीनिवासनिगमान्त यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री लक्ष्मीनृसिंहादि सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहादि सुप्रभातम् ॥

कौसल्यासुप्रजा ! राम ! पूर्वा संध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल ! कर्तव्यं दैवमाह्निकम् ॥ 1 ॥

श्रीमान् रामानुजार्यो यतिपतिरखिलान् त्रातुकामः स्वशिष्यान्
भाष्यं शारीरकार्थप्रकटनमकरोत् बाह्यसिद्धान्तभेत्ता।
यस्तस्मिन् क्षुभ्यमाणे कथककुलवचोवज्रपातैस्स भूयः
साक्षादुत्प्रेक्ष्यमाणोऽभवदिति जयतात् श्रीनिवासो यतीन्द्रः ॥ 2 ॥

तव सुप्रभातमरुणाब्जलोचने
तरुणेन्दुबिम्बवदनेऽघमोचने।
शरणागतार्तिहरणाय दीक्षिते
करुणारसौघवरुणालयेक्षिते ॥ 3 ॥

तव सुप्रभातममरेन्द्रसुन्दरि !
करपल्लवान्तकलितोरुमालिनि।
क्षणरुक्सहस्रतुलिताङ्गसौभगे
कनकाञ्चितोरुमणिकुण्डलाञ्छिते ॥ 4 ॥

तव सुप्रभातमसुरारिवल्लभे !
निजवल्लभाङ्क सरसीसरोरुहे।
करपल्लवात्तजलजातकुड्मले
रविकोटिभासि कुरुविन्दमौळिके ॥ 5 ॥

तव सुप्रभातमखिलार्तिभञ्जनि !
    प्रणतार्तभक्तजनचित्तरञ्जनि।
वरतापनीयविदितात्मवैभव -
    प्रियवक्त्रचन्द्रसुचकोरलोचने ॥ **6** ॥

देवाश्चतुर्मुखपुरन्दरशङ्कराद्याः
    सिद्धाः सनातनसनन्दननारदाद्याः।
त्वामर्चितुं विविधपुष्पकराश्चरन्ति
    लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **7** ॥

देवो दिवाकर इह प्रथितप्रकाशो
    दिव्यैः करैस्त्वदनघाङ्घ्रियुगं सहस्रैः।
संवाहितुं भृशमुदेति हरेर्दिशायां
    लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **8** ॥

वेदाश्च सामयजुरादय आविभान्ति
    शब्दैरलक्षितगुणैः स्वगुणं स्तुवन्तः।
त्वल्लिङ्गनामगुणकीर्तनलब्धभावाः
    लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **9** ॥

विप्राः स्वनुष्ठितगरिष्ठगुणक्रियाद्याः
    स्नाता विशुद्धमनसो विमलैर्वचोभिः।
त्वां स्तोतुमद्य विविधैः प्रणताश्चरन्ति
    लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **10** ॥

उच्चैश्रवस्तुलित एष विभाति तेऽश्वः
    स्तम्बेरमा मदजलाप्लुतगण्डदेशाः।
भृत्याश्च ते करयुगोद्धृतचामराद्याः
    लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **11** ॥

धेनुः पुरन्दरपुरान्तरभूषणं सा
त्वत्किङ्करत्वकरणाय धरामवाप्य।
त्वद्दृष्टिभावितसुधामसुधासुधारां
आकाङ्क्षते नरहरे ! तव सुप्रभातम् ॥ **12** ॥

भृत्योऽहमद्य यतिरूपमुपेयिवांस्ते
पादाम्बुजद्वयपरीचरणाय यत्तः।
जागर्मि विश्वगुणनिर्मितनर्मशील
लक्ष्मीनृकेसरिविभो ! तव सुप्रभातम् ॥ **13** ॥

वाराशिराजतनयानयनाम्बुजात -
माध्वीरसज्ञनयनाख्यमिलिन्दयुग्मम्।
सञ्चारयाद्य विनतेषु तदीयभक्ति -
सारग्रहाय नृहरे ! तव सुप्रभातम् ॥ **14** ॥

सह्यापगोत्तरतरङ्गविभङ्गसङ्ग -
तुङ्गाङ्गशीतिममरुज्जडिमोत्तरङ्गे।
रङ्गे विहाय रुचिमत्र विराजसे त्वं
श्रीरङ्गनायकविभो ! तव सुप्रभातम् ॥ **15** ॥

नारायणाद्रिविसरद्विपुलस्रवन्ती
निष्क्रान्तनिर्झरझलञ्झलगाढशब्दैः।
अस्पृष्टमानस इवात्र विहारकाङ्क्षी
त्वं भासि वेङ्कटपते ! तव सुप्रभातम् ॥ **16** ॥

गोपीगृहान्तरुपकल्पितमन्थनात्त -
हैयङ्गवीनहृतिकल्पितनृत्तजातम्।
अद्यापि तथ्यमिह कर्तुमिवासि तादृग् -
रूपो यदूत्तमविभो ! तव सुप्रभातम् ॥ **17** ॥

इत्थं रमानृहरिरङ्गधुरीणशेष -
शैलेश यादवकुलाधिपसुप्रभातम्।
भक्त्या परं व्यतनुताखिलसाधुभाव्यं
श्री श्रीनिवासनिगमान्तयतिर्विशुद्धः॥ **18**॥

॥ इति श्री लक्ष्मीनृसिंहादि सुप्रभातं समाप्तम्॥